श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री श्रीनिधिस्वामि विरचिता

# ॥ श्रीरामचतुःश्लोकी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri N. Ananthanarayana of Chennai for his help in the preparation of this document.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री सीता लक्ष्मण भरत शत्रुघ्न हनुमत्समेत श्री रघुनन्दन परब्रह्मणे नमः

# ॥ श्रीरामचतुःश्लोकी ॥

कवितार्जितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

रामः कौशिकमन्वगात्पथि मुनेर्वाचाऽवधीत्ताटकां
सत्रं तस्य ररक्ष तेन कथिताः शुश्राव तास्ताः कथाः।
गत्वाऽथो मिथिलां विधाय दृषदं योषिन्मणिं सन्मुनेः
भङ्क्त्वा धूर्जटिचापमाप रमणीं सीताभिधानामपि॥ १ ॥

सीतायाः करलालनेन स कृती जित्वा मुनिं भार्गवं
साकेतं तरसा प्रविश्य जननीमानन्दयन्मध्यमाम्।
आसीद्यो विपिने चतुर्दश समा रक्षन्मुनीनानतान्
रक्षःसङ्घमथावधीदघटयद्राज्यं च सूर्यात्मजे॥ २ ॥

वायोरात्मभुवा ततो हनुमता पाथोधिपारस्थितां
प्राणेभ्योऽपि गरीयसीं प्रियतमां विज्ञाय रक्षोहृताम्।
सेतुं वारिनिधौ विधाय विविधानन्ताघविध्वंसनं
लङ्कायां विलुलाव रावणशिरोवृन्दानि वन्देय तम्॥ ३ ॥

आरुह्याथ विभीषणेन सुभगं भक्त्या समावेदितं
मान्यं पुष्पकमञ्जसा निजपुरीमागत्य मित्रैर्वृतः।
आनन्दाय वसिष्ठकाश्यपमुखैः पट्टाभिषिक्तो विभुः
तस्मिन् जाग्रति जानकीप्रियतमे का नाम भीतिर्मम॥ ४ ॥
(तस्मिन् जाग्रति जानकीप्रियतमे सर्वत्र सम्यग्जयः)

www.prapatti.com

धनुष्करचतुःश्लोकी धनुष्पुरकवीरिता।
मारीकातरचित्तानां मारीतिमितरां दिशेत्॥
(सर्वदा कुर्वतां चित्ते सर्वदा भातु सन्मता॥)

॥ इति श्रीरामचतुःश्लोकी समाप्ता ॥

www.prapatti.com